## अष्टमः पाठः

# कृतक-कलहः

**संस्कृतसाहित्ये बहूनि नाटकानि प्रणीतानि। प्रस्तुतोऽयं नाट्यांशः विशाखदत्तप्रणीतस्य मुद्राराक्षसस्य तृतीयाङ्कात् उद्धृतोऽस्ति।**

**अत्र राज्यतन्त्रस्याङ्गभूतत्वेन पूर्वयोजनया राक्षसनामानं मन्त्रिणं पराजेतुं चाणक्यचन्द्रगुप्तयोः कल्पितकलहः प्रवृत्तः। तस्यैव प्रस्तुतीकरणम् अत्र विद्यते।**

**पात्र-परिचयः**

| | | |
|---|---|---|
| **राजा** | – | चन्द्रगुप्तः (चाणक्यस्य प्रियशिष्यः) |
| **चाणक्यः** | – | अर्थशास्त्रप्रणेता ''कुटिल'' गोत्रीयः कौटिल्यः। |
| **कञ्चुकी** | – | आचार्यचाणक्येन निर्मितः चन्द्रगुप्तस्य सेवकः |
| **प्रतिहारी** | – | भटः |

(ततः प्रविशतः चन्द्रगुप्तचाणक्यौ)

**राजा** – आर्य! कस्माद्विक्रम्य न गृहीतः?

**चाणक्यः** – वृषल! राक्षसः खल्वसौ विक्रम्य निगृह्यमाणः स्वयं वा विनश्येत्, युष्मद्बलानि वा विनाशयेत्। एवं सत्युभयथाऽपि दोषः।

**राजा** – न शक्नुमो वयमार्य्यस्य मतिमतिशयितुं, सर्वथाऽमात्यराक्षसएवात्र प्रशस्यतरः।

**चाणक्यः** – (सक्रोधम्) 'न भवानि' ति वाक्यशेषः। मा तावदेवम्। भो वृषल! तेन किं कृतम्?

**राजा** – यदि न ज्ञायते, तदा श्रूयताम्। तेन खलु महात्मना –

**लब्धायां पुरि यावदिच्छमुषितं, कृत्वा पदं नो गले**
**व्याघातो जयघोषणादिषु बलादस्मद्बलानां कृतः।**
**अत्यर्थं विपुलै सुनीतिविभवैः सम्मोहमापादिता**
**विश्वास्येष्वपि विश्वसन्ति मतयो न स्वेषु वर्गेषु नः॥**

**चाणक्यः** – (विहस्य) वृषल! एतत् कृतं राक्षसेन?

**राजा** – अथ किम्? एतत् कृतममात्यराक्षसेन।

**चाणक्यः** – वृषल! मया पुनर्ज्ञातं, नन्दमिव भवन्तमुद्धृत्य भवानिव भूतले मलयकेतुरधिराज्यमारोपितः।

**राजा** – अलमुपालभ्य। आर्य! दैवेनेदमनुष्ठितं किमार्यस्य?

**चाणक्यः** – आः, केन?

**राजा** – नन्दकुलविद्वेषिणा दैवेन।

**चाणक्यः** – दैवमविद्वांसः प्रमाणयन्ति।

**राजा** – विद्वांसोऽप्यविकत्थना भवन्ति।

**चाणक्यः** – (सक्रोधम्) वृषल! वृषल!! भृत्यमिव मामारोढुमिच्छसि?

**शिखां मोक्तुं बद्धामपि पुनरयं धावति करः**

(भूमौ पादप्रहारं कृत्वा)

**प्रतिज्ञामारोढुं पुनरपि चलत्येष चरणः।**

**प्रणाशान्नन्दानां प्रशममुपयातं त्वमधुना**

**परीतः कालेन ज्वलयसि मम क्रोधदहनम्॥**

**राजा** – (सावेगं स्वगतम्) अये! तत् कथं सत्यमेव कुपित आर्यः?

**चाणक्यः** – (कृतककोपं संहृत्य) वृषल! वृषल!! अलमुत्तरोत्तरेण। यद्यस्मत्तो वरीयान् राक्षसोऽवगम्यते,तस्मादिदं शस्त्रं तस्मै दीयताम्।

(इति शस्त्रमुत्सृज्य च आकाशे लक्ष्यं बद्ध्वा स्वगतम्)

राक्षस! राक्षस!! एष भवतः कौटिल्यबुद्धिविजिगीषोर्बुद्धेः प्रकर्षः?

**राजा** – आर्य! वैहीनरे! 'अद्य प्रभृत्यनादृत्य चाणक्यं चन्द्रगुप्तः स्वयमेव राजकार्याणि करिष्यती' ति गृहीतार्थाः प्रकृतयः क्रियन्ताम्।

**कञ्चुकी** – (स्वगतम्) कथं निरुपपद एव चाणक्यो, नार्यचाणक्य इति। हन्त! सत्यमेव हृतोऽधिकारः।

**राजा** – आर्य! किं विचारयसि?

**कञ्चुकी** – देव! न किञ्चिद्विचारयामि, किन्तु एतद्विज्ञापयामि, दिष्ट्या देव इदानीं देवः संवृत्त इति।

**राजा** – (आत्मगतम्) एवमस्मासु गृह्यमाणेषु स्वकार्यसिद्धिकामः, सकामो भवत्वार्यः। (प्रकाशम्) शोणोत्तरे! अनेन शुष्ककलहेन शिरोवेदना मां बाधते तच्छयनगृहमार्गमादेशय।

**प्रतिहारी** – एतु एतु महाराजः।

**राजा** – (आसनादुत्थायात्मगतम्)

आर्याज्ञयैव मम लङ्घितगौरवस्य बुद्धिः प्रवेष्टुमवनेर्विवरं प्रवृत्ता।

ये सत्यमेव न गुरून् प्रतिमानयन्ति तेषां कथं नु हृदयं न भिनत्ति लज्जा?

**( इति निष्क्रान्ताः सर्वे )**

## शब्दार्थः

| | | |
|---|---|---|
| वृषलः | – | नीचः (नीच) |
| विक्रम्य | – | विक्रमेण (विक्रमशीलता से) |
| प्रशस्यतरः | – | श्रेष्ठतरः (अतिश्रेष्ठ) |
| नन्दकुलविद्वेषिणा | – | नन्दकुलवैरिणा/ नन्दकुलविद्वेषीद्वारा |
| प्रकर्षः | – | निष्कर्षः (निष्कर्ष है) |
| शुष्ककलहेन | – | शुष्क कलह से |
| एतु एतु | – | चलतु चलतु। |

## अभ्यासः

1. **एकपदेन उत्तरत–**

   क) नृपस्य नाम किम्?

   ख) चन्द्रगुप्तस्य आचार्यः कः?

   ग) चाणक्यप्रणीतग्रन्थस्य नाम किम्?

   घ) शुष्ककलहेन किं बाधते?

   ङ) मुद्राराक्षसस्य प्रणेता कः?

2. **एकवाक्येन उत्तरत–**

   क) कलहः कयोः मध्ये प्रवृत्तम्?

   ख) कञ्चुकी किं विज्ञापयति?

   ग) दैवेन किमनुष्ठितम्?

   घ) चाणक्यः राक्षसं प्रति किं वदति?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत–**

   क) राक्षसः एव कुतो प्रशस्यतरः?

   ख) राक्षसेन किं कृतम्?

   ग) चन्द्रगुप्तचाणक्ययोः कलहं वर्णयत?

   घ) आचार्यचाणक्यः चन्द्रगुप्तेन सह किमर्थं कलहं करोति?

   ङ) राजा कञ्चुकीं प्रति किं वदति?

4. **सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत–**

   क) कस्माद्विक्रम्य

   ख) खल्वसौ

ग) तावदेवम्

घ) प्रभृत्यनादृत्य

ङ) हतोऽधिकारः

च) चलत्येषः

छ) तच्छयनगृहम्

5. **योजयित्वा सन्धेः नाम लिखत–**

क) पुनः + अपि

ख) खलु + इदम्

ग) करिष्यति + इति

घ) मार्गम् + आदेशय

ङ) मलयकेतुः + अधिराज्यम्

च) युष्मत् + बलानि

6. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत –**

क) कृतककलहः

ख) नन्दकुलविद्वेषिणा

ग) महाराजः

घ) महात्मना

ङ) अविद्वांसः

7. **विभक्त्यनुसारम् उचितशब्दं योजयत–**

| | अ | ब |
|---|---|---|
| क) | राजा | महाराजस्य |
| ख) | राज्ञा | महाराजे |
| ग) | राजानम् | महाराजः |
| घ) | राजनि | हे महाराज |
| ङ्) | राज्ञः | महाराजेन |
| च) | राज्ञे | महाराजात् |
| छ) | राज्ञः | महाराजम् |
| ज) | हे राजन् | महाराजाय |

8. **विलोमशब्दं लिखत -**

| | | |
|---|---|---|
| क) | महात्मा | x |
| ख) | सुनीतिः | x |
| ग) | अविद्वांसः | x |
| घ) | सक्रोधम् | x |
| ङ) | सत्यमेव | x |
| च) | शेषः | x |

9. **रिक्तस्थानेषु उचितधातुरूपाणि लिखत-**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| क) | भवामि | ................ | ................ |
| ख) | ज्ञायते | ................ | ................ |
| ग) | श्रूयताम् | ................ | ................ |
| घ) | ............... | ................ | प्रमाणयन्ति |
| ङ) | ................ | इच्छथः | ................ |
| च) | विचारयसि | ................ | ................ |
| छ) | ............. | ................ | बाधन्ते |
| ज) | आदेशय | ................ | ................ |

10. **कोष्ठकस्थैः अव्ययैः वाक्यं रचयत-**

(एव, अत्र, तदा, खलु, इति, एवम्, वा, अथ)

## योग्यताविस्तारः -

शिक्षकसाहाय्येन अवजानन्तु-

- चाणक्यस्य अर्थसङ्ग्रहे कति विद्याः वर्णिताः?
- चन्द्रगुप्तस्य इतिहासः कः?
- मुद्राराक्षसस्य नाटकस्य वैशिष्ट्यं किम्?
- विशाखदत्तस्य रचना का? तस्य सारांशः कः?